काठक विवाह मन्त्राः

२.१४.५. ऋतमेव परमेष्ठ्यृतं नात्येति किञ्चन ।
ऋत इयं पृथिवी श्रिता सर्वामिदमियमसौ भूयात् ॥

२.१५.५. समाना व आकूतानि समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥
सं वो मनांसि सं व्रता समु चित्तान्यकरम् ।
अमी ये विव्रताः स्थन तान्नः सन्नमयामसि ॥

२.१६.४. हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥

२.१७.२. स्वनं वद दुन्दुभे सुप्रजस्त्वाय गोमुख ।
प्रक्रीड्यन्तु कन्याः सुमनस्यमानाः सहेन्द्राण्या कृतमंगलाः ॥

२.१८.१. या तेऽलक्ष्मीर्मातृमयी पितृमयी संक्रामणी सहजा वापि काचित्तां ॥
तिष्येण सह देवतया निर्भजामि निर्दुणामि ।
सा द्विषन्तं गच्छतु तिष्यबृहस्पतिभ्यां नमो नमः ॥

२.२१.१. क्रीडं वः शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभिप्रगायत ॥

२.२१.२. अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥

२.२४.६. मयि दोहोऽसि विराजो दोहः पाद्यायै विराजो दोहमशीय ॥

२.२४.७. विष्टरोऽसि मातरि सीद ॥

२.२४.१०. शन्नो देवीरभिष्ट्य आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥
इदमहमस्मिन् कुले ब्रह्मवर्चसं ददामि । इदमहं मां मयि तेजो वीर्यमन्नाद्यं प्रजां पशून् ब्रह्मवर्चसं ददामि ॥

१.२४.१. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥

२.२४.१२. वसवस्त्वाग्निराजानो भक्षयन्तु पितरस्त्वा यमराजनो बक्षयन्तु रुद्रस्त्वा सोमराजानो भक्षयन्त्वादित्यास्त्वा वरुनराजानो भक्षयन्तु विश्वे त्वा देवा

बृहस्पतिराजानो भक्षयन्तु ॥
२.२४.१३. यन्मधुनो मधव्यस्य परमस्यान्नाद्यस्य परममन्नाद्यं रूपं ॥
तेनाहं मधुनो मधव्यस्य परमस्यान्नाद्यस्य परमोऽन्नादो मधव्यो भूयासम् ॥
त्रय्यै विद्यायै यशोऽसि श्रियै यशोऽसि यशसे ब्रह्मणे दीप्तिरसि ॥
सत्यश्रीर्यशःश्रीर्मयि श्रीः श्रीः श्रयताम् ॥
१.२४.१४. अमृतोपस्तरणमसि ॥
१.२४.१७. हतो मे पाप्मा पाप्मानं मे हत ।
यां त्वा देवा वसवोऽन्वजीविषुरादित्यानां स्वसारं रुद्रमातरम् ।
दैवीं गामादितिं जनानामारभन्तामर्हतामर्हणाय ॥
१.२५.१८. गृभ्णामि ते सुप्रजस्त्वाय हस्तौ मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
१.२४.२०. माता रुद्राणां दुहिता वसूनां स्वसादित्यानामृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ठ ॥
१.२५.१. अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नो निनीयात् सं जास्पत्यं सुयमस्तु देवाः ॥
१.२५.४. शन्न आपो धन्वन्या शन्नं सन्त्वनूप्याः ।
शन्नः समुद्रिया आपः शमु नः सन्तु कूप्या ॥
या अकृन्तन्या अवयन्या अतन्वत याश्च देवीरन्तां अभितोऽततन्थ ।
तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः ॥
१.२५.५. प्रेतो मुञ्चातु मामुतः सुबद्धाममृतस्करम् ।
यथेयमिंद्र मीढ्वः सुपुत्रा सुभगासति ॥
पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहतां रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदये मा वदासि ॥
मा विदन्परिपंथिनो य आसीदन्ति दम्पती ।
सुगोभिर्दुर्गमतीतामपद्रान्त्वरातयः ॥
१.२५.८. योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये ॥
१.२५.९. खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालामिन्द्रस्त्रिष्पूत्वा करोतु सूर्यवर्चसम् ॥
शं ते हिरण्यं शमु सन्त्वापः शं ते मेथी भवतु शं युगस्य तर्म ।

शं त आपः शतपवित्रा भवन्त्वेना पत्या तन्वा संसृजस्व ॥
१.२५.१०. अग्नये जनिविदे स्वाहा सोमाय जनिविदे स्वाहा गन्धर्वाय जनिविदे स्वाहा ॥
१.२५.१५. आकूत्यै त्वा कामाय त्वा समुद्ध्यै त्वा ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
अग्न आयूंषि पवस आसुवोर्जमिषञ्च नः ।
आरे बाधस्व दुच्छुनान् ॥
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तमीमहे महागयम् ॥
१.२५.१६. या ते पतिघ्नी तनूरपतिघ्नीं ते तां करोमि ।
या तेऽपुत्रिया तनूः पुत्रियां ते तां करोमि ।
या तेऽपशव्या तनूः पशव्यां ते तां करोमि ॥
१.२५.१९. देवस्य सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥
१.२५.२० इयं नार्युप्रब्रूतेऽग्नौ लाजानावपन्ती ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥
तां पूषञ्शिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशति विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥
सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्
॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरियोऽहं
मनुष्यज ॥
१.२५.१९. सरस्वति प्रेदमव सुभगो वाजिनीवती ।
श्या त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः ।
यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत् ।
तामध्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥
१.२५.२३. सा त्वमस्यमोऽहममोऽहमस्मि सा त्वं ।
ता एहि विववाहवै पुंसे पुत्राय कर्तवे ।
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥
१.२५.२४. अश्मानमातिष्ठाश्मेव त्वं स्थिरो भव । कृण्वन्तु विश्वेदेवा आयुष्टे शरदः शतम् ।
आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव । प्रमृणीहि दुवस्यवः सहस्व पृतन्यत ॥

१.२५.२६. अर्यमणं नु देवं कन्या अग्निमयक्षत ।
सोऽस्मान्देवो अर्यमा प्रेतो मुञ्चातु मामुष्य गृहेभ्यः ॥
१.२५.२८. इयं नार्यपब्रूते तोक्मान्यावपन्तिका । दीर्घायुरस्तु ज्ञातयो ममेति ॥
१.२५.३१. गन्धर्वं पतिदेवनं कन्या अग्निमयक्षत ।
सोऽस्मान्देवो गन्धर्वः प्रेतो मुञ्चातु मामुष्य गृहेभ्यः ॥
१.२५.३३. त्र्यम्बकं यजामहे सुगन्धिं पतिपोषणम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामुष्य गृहेभ्यः ॥
१.२५.३४. पूषा मा पशुमाननया पशुमन्तं करोतु । जीवपत्नीर्भूयासम् ॥
१.२५.३८. एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मयोभवाय पञ्च प्रजाभ्यः
षड्तुभ्यो दीर्घायुत्वाय सप्तमं सखा सप्तपदा भव ।
सुमृडीका सरस्वति मा ते व्योम सन्दृशि ॥ विष्णुस्त्वान्वेत्यनुषङ्गः ॥
१.२५.४२. सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥
१.२५.४३. इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्रानां धेहि पतिमेकादशं कृधि ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
स्नुषाणां श्वशुराणां च प्रजायाश्च धनस्य च ।
पतिनां देवराणां च सजातानां विराड्भव ॥
१.२६.१. योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥
१.२६.२. अङ्कुन्यङ्का अभितो रथं ये ध्वान्ता वाताग्रमभि ये संपतन्ति ।
दूरहेतिः पतत्रिणीवाजिनीवांस्ते नोऽग्नयः प्रपयः पारयन्त्व ॥
१.२६.३. खे रथस्य खेऽनसः खे युगस्य च तर्मसु । खे अक्षस्य स्वे अवधामि ॥
१.२६.४. सुकीशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आरोह सूर्ये अमृतस्य योनिं स्योनं पत्ये वहतुं कृणुष्व ॥
१.२६.४. मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीताय द्रान्त्वरातयः ॥
१.२६.६. संकाशया विवहतं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण ।
पर्याणद्धं विश्वरूपं यदस्याः स्योनं पतिभ्यः सविता कृणोतु ॥
१.२७.३. ऊर्जं बिभ्रति वसुवनिः सुमेधा गृहनागां मोदमाना सुवर्चाः ।

अघोरेण चक्ष्युषाहं मैत्रेण गृहाणां पश्यन्ती वय उत्तिरामि ॥
गृहाणामायुः प्र वयं तिराम गृहा अस्माकं प्रतिरन्त्वायुः ॥
गृहानहं सुमनसः प्रपद्ये वीरघ्नी वीरपतिः सुशेवा ।
इरां वहतो घृतमुक्षमाणांस्तेष्वहं सुमनाः संविशामि ॥
येषां मध्ये ऽधिप्रवसन्नेति सौमनसं बहु । गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥ सूनृतावन्तः स्वधावन्त इरावन्तो ह सामदाः । अक्षुध्या अतृष्या गृहा मास्मद्बिभेतन ॥ उपहूता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलाल उपहूतो गृहेषु मे ॥ उपहूता भूरिधनाः सखायः साधुसंमदाः । अरिष्टाः सर्वपुरुषा गृहा नः सन्तु सर्वद ॥
१.२८.४. अग्निरैतु प्रथमो देवतानां सो ऽस्याः प्रजां मुञ्चतु मृत्युपाशात् ।
अरिक्तोपस्था जीवितामस्तु माता पौत्रमानन्दमभिविबुध्यतामियम् ॥
मा ते गृहे निशि घोर उत्थादन्यत्र त्वद्रुत्यः संविशन्तु ।
जीवपुत्रा पतिलोके विराज पश्यन्ती प्रजां सुमनस्यमानाम् ॥
मा ते कुमारः स्तनधः प्रमायि मा त्वं विकेश्युर आवधिष्टाः ।
स्तनं धयन्तं सविताभिरक्षत्वा वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु नित्यम् ॥
अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि यास्यां भृशा तनूस्तामस्या नाशया ॥
वायो प्रायश्चित्ते ॥ सूर्य प्रायश्चित्ते ॥ चन्द्र प्रायश्चित्ते ॥ विष्णो प्रायश्चित्ते ॥
विष्णो प्रायश्चित्ते ॥ चन्द्र प्रायश्चित्ते ॥ सूर्य प्रायश्चित्ते ॥ वायो प्रायश्चित्ते ॥
अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि यास्यां भृशा तनूस्तामस्या नाशया स्वाहा ॥
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषमिति ॥
१.२९.१. अन्नमेव विवननमन्नं संवननं स्मृतम् ॥
अन्नं पशूनां प्राणोऽन्नं ज्येष्ठं भिषक् स्मृतम् ॥
अन्नमयेन मणिना प्राणसूत्रेण पृश्निना ।
सिनोमि सत्यग्रन्थिना हृदयं च मनश्च ते ।
सह वाचा मनो अस्तु सह चित्तं सह व्रतम् ॥
चक्रमिवानडुहः सूर्यं च मा चान्येषु मनः कृथाः ।
चाक्रवाकं संवननं मम चामुष्याश्च भूयादिति ॥